# અસિતકૃતં શિવસ્તોત્રમ

## Asitakrutam Shivastotram

---

અસિત કૃતં શિવ સ્તોત્રમ

અસિત ઉવાચ ||

જગદ્ગુરો નમસ્તુભ્યં શિવાય શિવદાય ચ |
યોગીન્દ્રાણાં ચ યોગીન્દ્ર ગુરૂણાં ગુરવે નમઃ ||૧||

મૃત્યોર્મૃત્યુસ્વરૂપેણ મૃત્યુસંસારખણ્ડન |
મૃત્યોરીશ મૃત્યુબીજ મૃત્યુઞ્જય નમોઽસ્તુ  તે ||૨||

કાલરૂપં કલયતાં કાલકાલેશ કારણ |
કાલાદતીત કાલસ્થ કાલકાલ નમોઽસ્તુ તે ||૩||

ગુણાતીત ગુણાધાર ગુણબીજ ગુણાત્મક |
ગુણીશ ગુણિનાં બીજ ગુણિનાં ગુરવે નમઃ ||૪||

બ્રહ્મસ્વરૂપ બ્રહ્મજ્ઞ બ્રહ્મભાવે ચ તત્પર |
બ્રહ્મબીજ સ્વરૂપેણ બ્રહ્મબીજ નમોઽસ્તુ તે ||૫||

ઇતિ સ્તુત્વા શિવં નત્વા પુરસ્તસ્થૌ મુનીશ્વરઃ |
દીનવત્સાશ્રુનેત્રશ્ચ પુળકાઞ્ચિતવિગ્રહઃ ||૬||

અસિતેન કૃતં સ્તોત્રં ભક્તિયુક્તશ્ચ યઃ પઠેત |
વર્ષમેકં હવિષ્યાશી શઙ્કરસ્ય મહાત્મનઃ ||૭||

સ લભેદ્વૈષ્ણવં પુત્રં જ્ઞાનિનં ચિરજીવિનમ |
દરિદ્રો ભવેદ્ધનાઢ્યો મૂકો ભવતિ પણ્ડિતઃ ||૮||

અભાર્યો લભતે ભાર્યાં સુશીલાં ચ પતિવ્રતામ |
ઇહ લોકે સુખં ભુક્ત્વા યાત્યન્તે શિવસન્નિધિમ ||૯||

ઇદં સ્તોત્રં પુરા દત્તં બ્રહ્મણા ચ પ્રચેતસે |
પ્રચેતસા સ્વપુત્રાયાસિતાય દત્તમુત્તમમ ||૧૦||

ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે શ્રીકૃષ્ણજન્મખણ્ડે
અસિતકૃતં શિવસ્તોત્રં સંપૂર્ણમ ||